## ३२ द्वात्रिंश दशकः - यक्ष कथा

पुरा सुरा वर्षशतं रणेषु निरन्तरेषु त्वदनुग्रहेण ।
विजित्य दैत्यान् जननी मपि त्वां विस्मृत्य दृप्ता नितरां बभूवुः ॥ ३२-१॥

मयैव दैत्या बलवत्तरेण हता न चान्यै रिति शक्रमुख्याः ।
देवा अभूव न्नतिदर्पवन्तः त्वं देवि चान्तः कुरुषे स्म हासम् ॥ ३२-२॥

तच्चित्त दर्पासुर नाशनाय तेजोमयं यक्ष वपु र्दधाना ।
त्वं नातिदूरे स्वय माविरासीः त्वां वासवाद्या ददृशुः सुरौघाः ॥ ३२-३॥

सद्यः किला शङ्क्यत तैरिदं किं मायाऽऽसुरी वेति ततो मघोना ।
अग्नि र्नियुक्तो भवती मवाप्तः पृष्टस्त्वया कोऽसि कुतोऽसि चेति ॥ ३२-४॥

स चाह सर्वै र्विदितो ऽग्नि रस्मि मय्येव तिष्ठत्यखिलं जगच्च ।
शक्नोमि दग्धुं सकलं हविर्भुक् मद्वीर्यतो दैत्यगणा जिताश्च ॥ ३२-५॥

इतीरिता शुष्क तृणं त्वमेकं पुरो निधायात्थ दहैतदाशु ।
एवं ज्वलन्नग्नि रिदं च दग्धुं कुर्वन् प्रयत्नं न शशाक मत्तः ॥ ३२-६॥

स नष्टगर्वः सहसा निवृत्तः ततोऽनिलो वज्रभृता नियुक्तः ।
त्वां प्राप्तवा नग्निवदेव पृष्टो देवि स्वमाहात्म्य वचो बभाषे ॥ ३२-७॥

मां मातरिश्वा नमवेहि सर्वे व्यापारवन्तो हि मयैव जीवाः ।
न प्राणिनः सन्ति मया विना च गृह्णामि सर्वं चलयामि विश्वम् ॥ ३२-८॥

इत्युक्त माकर्ण्य तृणं तदेव प्रदर्श्य चैतच्चलयेत्य भाणीः ।
प्रभञ्जनस्तत्स च कर्म कर्तुं अशक्त एवास्तमदो निवृत्तः ॥ ३२-९॥

अथातिमानी शतमन्युरन्तः अग्निं च वायुं च हसन्नवाप ।
त्वां यक्षरूपां सहसा तिरोऽभूः सोऽदह्यतान्तः स्वलघुत्वभीत्या ॥ ३२-१०॥

अथ श्रुताकाश वचोऽनुसारी ह्रीङ्कार मन्त्रं स चिराय जप्त्वा ।
पश्यन्नुमां त्वां करुणा श्रुनेत्रां ननाम भक्त्या शिथिलाभिमानः ॥ ३२-११॥

ज्ञानं परं त्वन्मुखतः स लब्ध्वा कृताञ्जलि र्नम्रशिरा निवृत्तः ।
सर्वामरेभ्यः प्रददौ ततस्ते सर्वं त्वदिच्छा वशगं व्यजानन् ॥ ३२-१२॥

ततः सुरा दम्भ विमुक्ति मापुः भवन्तु मर्त्याश्च विनम्र शीर्षाः ।
अन्योन्य साहाय्य कराश्च सर्वे मा युद्धवार्ता भुवनत्रयेऽस्तु ॥ ३२-१३॥

त्वदिच्छया सूर्य शशाङ्क वह्नि वाय्वादयो देवि सुराः स्वकानि ।
कर्माणि कुर्वन्ति न ते स्वतन्त्राः तस्यै नमस्तेऽस्तु महानुभावे ॥ ३२-१४॥